

# चैत्यवन्दनचतुर्विंशतिः ।

प्रणेता—

श्रीमद्विजयलब्धिसूरीश्वरजी

महाराजः

श्री लब्धिसूरीश्वर जैन ग्रन्थमालाया: अष्टमो मणि: [८]

जैनरत्न व्याख्यानवाचस्पति कविकुलकिरीट सूरि-
सार्वभौम जैनाचार्य श्रीमद्विजयलब्धिसूरीश्वर-
विरचिता—

# श्री चैत्यवन्दनचतुर्विंशतिः।

जीवरक्षाप्रचारकाचार्यवर्यश्रीमद्विजयगंभीरसूरि
वरोपदिष्ट—मद्रासजैनसंघार्पितार्थ साहाय्येन—

प्रकाशंप्रापयित्री

श्री लब्धिसूरीश्वर जैन ग्रन्थमाला।

वीर सं. २४६५ विक्रम १९९५ आत्म सं. ४४

मूल्यमाणकद्वयम्

प्राप्तिस्थानं प्रकाशकश्च–

चंदुलाल जमनादास शाह
छाणी–( वडोदरा स्टेट ).

इस्वी सन १९३९
प्रतयः १०००



जैनरत्न व्या. वा. कविकुलकिरीट सूरिसार्वभौम जैनाचार्य
**श्रीमद्विजयलब्धिसूरीश्वरजी महाराज.**

श्री महोदय प्रेस-भावनगर.

# चैत्यवन्दनचतुर्विंशतिः ।

( १ )

## श्रीआदिनाथजिनचैत्यवन्दनम्

( द्रुतविलम्बितम्[1] )

प्रथमतीर्थपतिं प्रथमं मुनिं
निचितपापतमोभरभास्करम् ।
अनतिपातिपदस्य विधायकं
निखिलसौख्यविलासकरं परम् ॥ १ ॥

---

१ " द्रुतविलम्बितमाह नभौ भरौ " इति लक्षणम् । यत्र पादे न–भ–भ–रगणा भवन्ति तद् द्रुतविलम्बितमित्युच्यत इत्यर्थः । पादे चात्र द्वादशाक्षराणि भवन्ति ।

तत्राष्टौ गणाः—भ–ज–स–य–र–त–म–नगणाः । आदिगुरुः–लघुद्वयं च यत्र स **भगणः** ( ऽ ।। भगणः ), आद्यन्तयोर्लघुर्मध्ये गुरुश्च यत्र स **जगणः** ( । ऽ । जगणः ), आद्यद्वयं लघुरन्ते गुरुर्यत्र स **सगणः** ( ।। ऽ सगणः ), यत्र च प्रथमो लघुरन्त्यौ च द्वौ गुरू स **यगणः** ( । ऽ ऽ यगणः ), यत्राद्यन्तयोर्गुरूर्मध्ये लघुश्च स **रगणः** ( ऽ । ऽ रगणः ), यत्र प्रथमौ द्वौ गुरु तृतीयो लघुश्च स–

जगदनीहितदुःखविदारकं
प्रवरबुद्धिरमोदयधारकम् ।
शुचिगुणैर्जगदुज्ज्वलकारकं
वितथकार्यविकारविनाशकम् ॥ २ ॥

नतसुरासुरनाथसमाजकं
सकलसन्मतिभावविकाशकम् ।
हृदयमाथकमन्मथमाथकं
नमत नाथमनाथसहायकम् [ विशेषकम् ] ॥३॥

( २ )

## श्रीअजितनाथचैत्यवन्दनम्

( तोटकम्[२] )

विजयासुतवन्दनतोऽतिभवा जगतीह समीहितभावधरा ।
जनताऽजनि मोक्षविलासपरा प्रणमामि ततोऽहमिमं प्रमुदा ॥१॥

---

तगणः ( ऽऽ। तगणः ), यत्र वर्णत्रयमपि गुरुः स मगणः (ऽऽऽ मगणः), एवं वर्णास्त्रयोऽपि लघवश्चेत् स नगणो बोध्यः (।।। नगणः)

गु इति ग इति च गुरोस्संज्ञा, लु इति ल इति च लघोस्संज्ञा 'संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रं विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन' ॥ इति लक्षणेन गुरुर्बोध्यः, तदितरो वर्णस्तु लघुरवसेयः ॥

२ " इह तोटकमम्बुधिसैः प्रमितम् " इति लक्षणम् । यत्र पादे चत्वारः सगणास्सन्ति तत् तोटकमित्यर्थः । श्लोकेऽस्मिन् द्वादशाक्षरपरिमितः पादो बोध्यः ॥

अचिरात् सुचिरार्जितपापहरं भविनां भवहारकभावधरम् ।
दमिनां हृदये रमणं शरणं विबुधानतपादसरोजयुगम् ॥२॥

जगतामहितं सुहितं सुखदं गुणिभिर्गणितं गुणदं गुणिनम् ।
न कथं सुभजेयमहन्तमिमं मदनादिकमूलसमूलकषम् ॥३॥

( ३ )

## श्रीसंभवनाथजिनचैत्यवन्दनम्

( मन्दाक्रान्ता[३] )

सेनासूनुं गुणगणधरं पावनी यस्य वाणी
संसाराब्धेर्भवभयहरा तारयत्येव भव्यान् ।
शक्रेशाद्यैस्सुरगिरिवरे निर्मितश्चाभिषेकः
पूज्यं वन्दे सुरनरनतं संभवं तं जिनेन्द्रम् ॥१॥

दिव्यं ज्योतिस्तिमिरनिवहं हन्ति यस्य क्षणेन
लोकालोकप्रथितमहिमात्यन्तभास्वत् स्वरूपम्
ज्ञेयं ध्येयं विभुपदधरं सार्वभौमैर्मुनीशैः
तं तोष्टोमि प्रवरपदवीं प्राप्तुकामः प्रकामम् ॥२॥

---

३ "मन्दाक्रान्ता जलधिषडगैम्भौं नतौ ताद्गुरू चेत्" इति लक्षणम् । यत्र पादे म–भ–न–त–तगणास्ततो द्वौ गुरू चेदेवं चतुर्थषष्ठसप्तमेषु विरामश्च सा मन्दाक्रान्तेत्यर्थः । श्लोकेऽस्मिन् सप्तदशाक्षरपरिमितः पादो बोध्यः ॥

आत्मारामं कमलविमलं विश्वलब्धिस्वरूपं
ज्ञानागारं वरमतिकरं योगिनां गम्यरूपम् ।
शान्तं दान्तं विशदयशसं तीर्णसंसारकूपं
तार्क्ष्याङ्कान्तं मनसिजहरं नौमि विश्वस्य भूपम् ॥३॥

( ४ )

## श्रीअभिनन्दननाथचैत्यवन्दनम्

( शिखरिणी[४] )

न कश्चित् संसारे शरणमिह तं साम्बरिसूते
गुणच्छाया यस्य प्रबलविषयातापहरणा ।
सदा जापात् पापं प्रभवति न च प्राणिनिवहे
निरातङ्कं देवं भज हतदरं सौख्यभवनम् ॥ १ ॥

विशेषज्ञं वैद्यं विमलनयनं चन्द्रवदनं
महारोगारीणां हरणविषये प्राप्तयशसम् ।
महागोपं वन्दे वितिमिरकरं भाग्यभवनं
भवाब्धेर्निस्तारे सबलतरणिं मुक्तिगमकम् ॥२॥

---

४ "रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी" इति लक्षणम् । यत्र पादे य—म—न—स—भगणास्ततो लघुर्गुरुश्चेदेवं षडेकादशसु विरामश्च सा शिखरिणीत्यर्थः । श्लोकेऽस्मिन् सप्तदशाक्षरपरिमितः पादो ज्ञेयः ॥

नमाम्यात्मारामं कमलचरणं लब्धिवरदं
वनौकश्चिह्नन्तं कनककिरणं दिव्यतनुकम् ।
नयन्तं विज्ञानं भविकपटलं भावुकपरं
जगद्वन्द्यो योऽस्मिन् दिवि भुवि जने ख्यातमहिमा ॥३॥

( ५ )

## श्रीसुमतिनाथचैत्यवन्दनम्

( शार्दूलविक्रीडितम्[५] )

भक्त्या नौमि जिनं सदा शिवकरं दिव्यप्रभाभासुरं
तं तत्त्वविचारसारशरणं मोहाब्धिसंशोषकम् ।
ज्ञानोद्योतकरो गुणाकरगिरौ भास्वानिवाभासते
यो द्युत्या भुवने प्रकाशनिवहं विस्तारयन् सर्वदा ॥ १ ॥

नाम्ना यः सुमतिप्रभुर्मदनहा विश्वेशविद्यालयो
भास्वान् पूर्वगिराविवात्र हरति व्यारुह्य तीर्थाचलम् ।
अज्ञानात्मतमोभरं प्रतिदिनं सद्धर्मभव्यात्मनां
तं भूम्यामुपकारधूर्वहचणं भक्त्यार्चयाम्यन्वहम् ॥ २ ॥

---

५ "सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणम् । यत्र पादे म-स-ज-स-त तगणा गुरुसहिताश्च चेत् द्वादशसप्तमेषु विरामश्च तत् शार्दूलविक्रीडितमित्यर्थः । श्लोकेऽस्मिन् एकोनविंशत्यक्षरपरिमितः पादो बोध्यः ॥

क्रौञ्चाङ्कं सुगुणालयं जिनवरं सन्तीर्णदुःखार्णवं
आत्मारामपरं विकासकमलं यच्चक्षुषा निर्जितम् ।
तं लब्ध्यालयमाप्तमन्वहमहं सार्वं जगत्पावनं
मेघात्मोद्भवमार्यधर्मकरणात् सर्वार्यमुख्यं भजे ॥ ३ ॥

( ६ )

## श्रीपद्मप्रभचैत्यवन्दनम्

( वसन्ततिलका[६] )

पाद्मप्रभं सुरनराधिपसेव्यमानं
लोकैरगम्यमहिमाधिकसौख्यकारि ।
ज्ञानप्रदाय्यखिलकर्मतमःप्रहारि
नौमि द्वयं चरणयोश्चरणप्रचारि ॥ १ ॥

संसारदुर्जयपयोनिधियानपात्रं
सम्यक्त्वसारसुखदं परमं पुमांसम् ।
नेत्राब्जभास्करमनङ्गविभङ्गबीजं
सेवे सुरासुरवरार्चितपूतगात्रम् ॥ २ ॥

चञ्चत्प्रकाशनिहतारितमोनिकायं
विस्तारितातिविशदागमतत्त्वरूपम् ।

---

६ " उक्ता वसन्ततिलका तभजा जगौ गः " इति लक्षणम् । यत्र पादे त-भ-ज-जगणास्ततो द्वौ गुरू च चेत् सा वसन्ततिलके-त्यर्थः । श्लोकेऽस्मिन् चतुर्दशाक्षरपरिमितः पादो विज्ञेयः ॥

स्याद्वादभङ्गरचनार्पितसत्यबोधं
पद्मप्रभं प्रतिदिनं प्रणमामि भक्त्या ॥ ३ ॥

( ७ )

## श्रीसुपार्श्वनाथचैत्यवन्दनम्

( मालिनी[७] )

विततविमलभावः शुद्धशान्तस्वभावो
दिनकर इव नाथो दुर्मतिध्वान्तनाशी ।
स्वपरसमयसिद्धप्राणितत्त्वप्रकाशी
निखिलगुणगणानामाकरः श्रीजिनेशः ॥ १ ॥

रिपुदलमिव चक्री सर्वरोगादिशत्रून्
परिहरति जिनेशो धूतनिःशेषपापः ।
भविजनसुखकारी शुद्धचारित्रधारी
जयति विदितसारः प्राणिरक्षाप्रचारः॥२॥युग्मम् ॥

विकचकमलनेत्रं पूर्णचन्द्रानन न्तं
चरणकरणगेहं प्राप्तसौन्दर्यदेहम् ।
भविजननुतपादं ध्वस्तसर्वप्रमादं
भजत भविकजीवाः श्रीसुपार्श्वं जिनेन्द्रम् ॥ ३ ॥

---

७ " ननमयययुतेयं मालिनी भोगिलोकैः " इति लक्षणम् । यत्र पादे न—न—म—य—यगणा भवन्ति अष्टसप्तभिर्विरामश्च सा मालिनीत्यर्थः । श्लोकेऽस्मिन् पञ्चदशाक्षरपरिमितः पादो बोध्यः ॥

(८)

## श्रीचन्द्रप्रभचैत्यवन्दनम्

( पञ्चचामरम्[८] )

नमामि चन्द्रनामतः प्रभाधिकं प्रभुं वरं
शुभात्मतीक्ष्णचिन्तनाजितारिमोहमुद्भटम् ।
अवाप्तकेवलोज्ज्वलप्रभाप्रसारभासुरं
नतासुरामरेश्वरं विकाशिपादपङ्कजम् ॥ १ ॥

अनङ्गरङ्गभञ्जकं विशुद्धबुद्धिरञ्जकं
विलुप्तसर्वरागकं जगद्विकारनाशकम् ।
विशुद्धधर्मदायकं कुकर्मनाशसायकं
श्रयामि मुक्तिगामुकं वितीर्णसर्वभावुकम् ॥ २ ॥

अवद्यवर्गभेदकं सुखापवर्गकारकं
विशिष्टसौख्यधारकं विनीतदुःखवारकम् ।
अनादिदोषहारकं चरित्रबोधिदानतः
स्तवीमि तारकं परं मिथोऽदयातमोहरम् ॥ ३ ॥

---

८ " जरौ जरौ जगावतश्च पञ्चचामरम् " इति लक्षणम् । यत्र पादे ज–र–ज–र–जगणाः सगुरवश्चेत् एवमष्टभिर्विरामश्च तत् पञ्चचामरम् । श्लोकेऽस्मिन् षोडशाक्षरपरिमितः पादो विज्ञेयः ॥

( ९ )

## श्रीसुविधिनाथचैत्यवन्दनम्

( उपजातिः[१] )

नताखिलाखण्डलमौलिरत्न–
प्रभाच्छटाद्योतकपादपद्म ! ।
विध्वस्तमोहारिबल ! प्रकामं
लोके जय त्वं सुविधे ! जिनेन्द्र ! ॥ १ ॥

श्रुतेर्गुणानां श्रवणे पवित्रे
त्वन्नामजापाद्धृदयं विशुद्धम् ।
त्वद्दर्शनान्नेत्रमवाप्तशुद्धि
त्रिलाभदं त्वां न कथं भजेयम् ? ॥ २ ॥

अनन्तकारुण्यविशिष्टसत्त्वात्
सत्त्वानशेषान् शिवपूर्निनीषो ! ।
निकाच्य तीर्थङ्करनामभावं
जगज्जनानां शिवदाय्यभूस्त्वम् ॥ ३ ॥

---

९ "अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति लक्ष्णम् । यस्या पादेषु उपेन्द्रवज्रायाः इन्द्रवज्रायाश्चलक्षणं भवेत् सोपाजातिरित्यर्थः। इन्द्रवज्रोपेन्द्रवज्रयोर्लक्षणमग्रे द्रष्टव्यम् ॥

( १० )

## श्रीशीतलनाथचैत्यवन्दनम्

( स्रग्धरा[१०] )

विज्ञानाम्भोधरं त्वां मदनदहनतस्तप्तभव्यात्मभूम्यां
वर्षन्तं ज्ञानतोयं सुखकरचरणोत्पत्तिहेतुं निरीहम् ।
तृप्ता ज्ञानाम्बुपानाद्विबुधगुणिजना भावतः शान्तचित्ता
नित्यं हर्षाद् भजन्ते विपुलगुणधरं शीतलं श्रीजिनेन्द्रम् ॥१॥

नन्दाकुक्षिप्रसूतो दृढरथनृपतेर्नन्दनो ज्ञानदाता
विश्वे विज्ञानशाली *प्रकृतितिमिरहा तत्त्वपीयूषपूर्णः ।
भव्यानां भक्तिभाजां मनसिजहरणे यो महेशस्वरूपो
नित्यानन्दप्रसिद्धं परमशुभकरं नन्नमीमि प्रकामम् ॥ २ ॥

श्रद्धा त्वत्पादपद्मे स्मृतिरपि मम ते शासनस्य प्रभूता
त्वय्यर्चा नित्यमीहे नयनयुगलकं दर्शनात्ते प्रसन्नम् ।
संस्तुत्यान्ते प्रसक्तं गुणगणरसिकं मानसं मे प्रशस्तं
जिह्वाकर्णौ पवित्रौ ग्रहणश्रवणतस्त्वद्गुणानां सदैव ॥ ३ ॥

---

१० "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेऽयम्" इति लक्षणम् । यत्र पादे म–र–भ–न–य–य–यगणास्सन्ति सा स्रग्धरेत्यर्थः । अस्य वृत्तस्य सप्तमे सप्तमे सप्तमे यतिः । श्लोकेऽस्मिन् एकविंशत्यक्षरप्रमितः पादो बोध्यः।*कर्मप्रकृतिरित्यर्थः

( ११ )

## श्रीश्रेयांसनाथचैत्यवन्दम्

( हरिणी[११] )

अवधिरहिता दुःखावस्था विशाल! विनाशिता
तव गुणगणस्मृत्योदग्रा समूलतया त्वया ।
अगणितगुणश्रीश्रेयांस ! प्रबोधविधायक !
तदुपकृतिकां मालां सारां वहामि जिनेश्वर! ॥ १ ॥

कुसुमधनुषः शक्तिर्यस्मात् विनष्टमहोदया
विकसितमतिर्यस्य ध्यानात् दयाविषये सदा ।
प्रभवति मृतिर्नेयं दुष्टा यदाश्रितभावुके
प्रणमततरां तं श्रेयांसं शुभाशयभावतः ॥ २ ॥

कलिमलहृतौ शक्त्यापन्न ! भवाब्धिसुतारक !
विमलमतिभिस्सुष्टुज्ञात ! प्रभाकरभास्वर ! ।
समभिलषितश्रेष्टार्थानां प्रदानपरं वरं
हृतरिपुदलं भक्त्याहं त्वां नमामि निरन्तरम् ॥३॥

---

११ "रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा" इति लक्षणम्, यत्र पादे न–स–म–र–सगणास्ततो लघुगुरू च चेत्, एवं षट्चतुःसप्तमेषु विरामः सा हरिणीत्यर्थः । श्लोलेऽस्मिन् सप्तदशाक्षरपरिमितः पादोऽवसेयः ॥

( १२ )

## श्रीवासुपूज्यजिनचैत्यवन्दनम्

( वंशस्थम्[१२] )

अनन्तविज्ञानविकाशनाद् विभुः
कलाधिपाधिक्यमहोमहोर्मितः ।
व्यनाशयद् योऽघतमो जिनेश्वरोऽ-
नवद्यरूपं विमलं भजामि तम् ॥ १ ॥

स वासुपूज्यो यशसा महोज्ज्वलो
भवार्णवान्मां प्रहतं कुकर्मणा ।
समागतं श्रीजिनपादपङ्कजं
निरन्तरं रक्षतु लोकपावनः ॥ २ ॥

स्मरादिशत्रुक्षयकारि यद्बलं
जगत्तृषाहारि च यद्वचोऽमृतम् ।
समग्रसंशीतिहरा च यस्य वि-
ज्जिनेश्वरं नौमि तमीड्यमीश्वरम् ॥ ३ ॥

---

१२ "जतौ तु वंशस्थमुदीरितं जरौ" इति हि तत्स्वरूपम् । अत्र पादे ज–त–ज–रा गणा भवेयुः तद्वंशस्थं छन्द इति भावः । पादेऽत्र द्वादशाक्षराणि भवन्ति ॥

( १३ )

## श्रीविमलनाथचैत्यवन्दनम्

( भुजङ्गप्रयातम्[१३] )

नयानेकवादप्रमाणप्रतिष्ठा
सदा ज्ञानदात्री विधात्री चरित्रम् ।
यदीया सुवाणी कृपाणी पवित्रा
कृताऽशेषकर्मव्रजस्य प्रणाशे ॥ १ ॥

जिनेशो दिनेशो जगज्जीवनेता
चिदानन्दरूपस्तमोनाशकारी ।
वरेण्यो वराहाङ्कितो देवदेवः
सदाऽव्याद्विकाशी स शान्तस्वभावः ॥ २ ॥
( युग्मम् )

सपादे शते योजनानां समन्तात्
प्रभावात् प्रभोः सर्ववैरादयो नो ।
प्रभामंडलं भाति भामण्डलं यत्
ततोऽहं नमामि भ्रमामि प्रभुं नो ॥ ३ ॥

---

१३ " भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः " इत्येवं तत्स्वरूपम् । यस्य यगणचतुष्टयमण्डिताः पादा भवेयुस्तद्भुजङ्ग प्रयातं छन्दः । द्वादशाक्षरविलसितः पादोऽत्रावसेयः ॥

( १४ )

## श्रीअनन्तनाथचैत्यवन्दनम्

( शालिनी[१४] )

प्राज्यं राज्यं हस्तियूथैस्सनाथं
त्यक्तं स्त्रैणं रूपलावण्यगेहम् ।
येनाप्ताथ ख्यातचारित्रलक्ष्मी
स्तं सेवन्तेऽनन्तनाथं हि धन्याः ॥ १ ॥

रागद्वेषौ मूलतो यस्य नष्टौ
श्रेष्ठं ज्ञानं पूज्यते यश्च देवैः ।
वाण्या ईशो गीयतेऽमर्त्यनाथै–
र्जीयान्नित्यं दुःखहर्त्ता स नाथः ॥ २ ॥

दिव्यं देहं स्वेदमुक्तं सदैव
दुग्धाकारे रक्तमांसे च यस्य ।
रागाभावोऽदृष्टनीहारभुक्ती–
सोऽयं देवः पातु नित्यं भवान्नः ॥ ३ ॥

---

१४ "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः" इति लक्षणम् । यत्र मगणतगणद्वयं गुरुद्वयं च चेत् चतुर्षु सप्तसु विरामः सा शालिनीत्यर्थः, श्लोकेऽस्मिन् एकादशाक्षरपरिमितः पादो बोध्यः ।

( १५ )

## श्रीधर्मनाथचैत्यवन्दनम्

( आख्यानकी[१५] )

संवादिनी गीर्भुवनत्रयस्य
गिरां चतुष्क्रोशगमा यदीया ।
अघ्र्या गुणा भानुसुतस्य तस्याऽ-
भिनन्दये चारु चरित्रभावम् ॥ १ ॥

चिन्तामणिं धर्मजिनेश्वरं यो
दधाति चित्ते स समीहितं हि ।
सम्प्राप्नुयाज्ज्ञानसमस्तवित्तं
दरिद्रभावं सकलं पिनष्टि ॥ २ ॥

लोकाब्धिपारप्रगतो महेशो
जनं तथा पारयति प्रभु र्यः ।
श्री वीतरागः स उपासनीयः
सदैव सद्ध्यानविशिष्टचित्तः ॥ ३ ॥

---

१५ " आख्यातकी तौ जगुरू ग ओजे जतावनोजे जगुरू गुरुश्चेत् " इति लक्षणम् । यत्र प्रथमतृतीयपादयोः त–त–जगणा द्वौ च गुरू स्तः द्वितीयचतुर्थपादयोर्ज–त–जगणा द्वौ गुरू च सा आख्यातकीत्यर्थः, अपरनामाख्यानकी । श्लोकेऽस्मिन् एकादशाक्षरपरिमितः पादो बोध्यः ।

( १६ )

## श्रीशान्तिनाथचैत्यवन्दनम्

( इन्द्रवज्रा[१६] )

श्रीशान्तिनाथो भविभिर्विचिन्त्यो
गर्भेऽपि सोऽत्राकृत शान्तिभावम् ।
रोगं प्रणाश्य स्वविशेषपुण्या-
दापन्निजं नाम गुणाभिरामम् ॥ १ ॥

येन स्वचक्रित्वनिधी विहाय
क्षणाद्धृता संयमराज्यलक्ष्मीः ।
मोहं प्रचूर्यापि विशालशक्त्या
कैवल्यलक्ष्मीरवतु प्रभुस्सः ॥ २ ॥

लक्षाधिकद्वानवतिं सहस्रं
मुक्त्वा गणं स्त्रैणमगाद्वनं यः ।
आत्मीयशुद्धिं परमामकार्षी-
द्देवाधिदेवः शिवसद्म रातु ॥ ३ ॥

---

१६ "स्यादिन्द्रवज्रा यदि तौ जगौ गः" इति लक्षणम् । यत्र तगणद्वयं जगणो गुरुद्वयं च स्यात् तत्र इन्द्रवज्रानाम इत्यर्थः । श्लोकेऽस्मिन् एकादशाक्षरपरिमितः पादो बोध्यः ।

( १७ )

## श्रीकुन्थुनाथचैत्यवन्दनम्

( मञ्जुभाषिणी[१७] )

जिनकुन्थुनाथ ! अतिविश्रुतो भवान्
जनतापनोदनविधौ शशी यथा ।
रसखण्डभूमिमपहाय संयमं
परिगृह्य केवलधियं ललौ प्रभो ! ॥ १ ॥

मम जीवनेश ! नतिसञ्चयः पदो-
स्तव शुद्धयोर्भवतु पारमार्थिक ! ।
जगति त्वमेव शरणं भवे भवे
चरणं प्रदाय नय मोक्षसद्म माम् ॥ २ ॥

समकर्महारक ! दयामहोदधे !
मम चित्तवित्ततनवः प्रभोस्तव ।
स्मरणं निरन्तरमपि प्रभावक !
हृदयं च दर्शनमभीप्सतेऽक्षि वै ॥ ३ ॥

---

१७ "सजसा जगौ भवति मञ्जुभाषिणी" इति लक्षणम् । यत्र स-ज-स-जगणा गुरुः सन्ति सा मञ्जुभाषिणीत्युच्यते । श्लोकेऽस्मिन् त्रयोदशाक्षरपरिमितः पादो ज्ञेयः ॥

( १८ )

## श्रीअरनाथचैत्यवन्दनम्

( मौक्तिकमाला[१८] )

मन्मथहारी स गुणविहारी
पातु सदा मां शमरसगोभिः ।
चक्रिरमां स्वां तृणवदहासी–
द्यश्शुभचेता जिनवरनेता ॥ १ ॥

रक्षतु मोहान्मथितविमोहः
पापविपाकादरयतिनाथः ।
कल्पनिधानः शशिसमशीतः
शैत्यविधाता शिवसुखदाता ॥ २ ॥

त्वं भवपारं नयसि जनानां
सश्रयमिन्दीवरदलनेत्र ! ।
मौक्तिकमालां नुतिगणरम्या–
मर्पय एवं जिन ! तव कण्ठे ॥ ३ ॥

---

१८ "मौक्तिकमाला यदि भतनाद् गौ" इति लक्षणम् । यत्र त–नगणात् परौ गुरू स्तः सा मौक्तिकमालेत्यर्थः । श्लोकेऽस्मिन् एकादशाक्षरपरिमितः पादो बोध्यः ।

( १९ )

## श्रीमल्लिनाथचैत्यवन्दनम्

( इन्द्रवंशा[१९] )

श्रीमल्लिनाथो गुणभृज्जनैर्नतो
भव्याङ्गिभिस्त्वं सततं समीहितः ।
कुम्भोद्भवो नः शमजं सुखं सदा
रातात्प्रधानं कलशाङ्कितप्रभुः ॥ १ ॥

कर्मद्रुमोन्मूलनमत्तकुञ्जरो
मोहेभकण्ठीरव आप्तवन्दितः ।
वर्षीयदानेन दरिद्रता नृणां
येनापनीता जयतु प्रभुः प्रभुः ॥ २ ॥

कालादनन्तान्नहि विश्रुतं यत्
तीर्थङ्करत्वं वनिताकुटुम्बके ।
तदेव लब्ध्वा शुभभाग्ययोगतः
विचित्रमेतद् भवता व्यधायि वै ॥ ३ ॥

---

१९ "स्यादिन्द्रवंशा ततजैरसंयुतैः" इति लक्षणम् । यत्र त-त-ज-रगणास्स्युः सा इन्द्रवंशा । श्लोकेऽस्मिन् द्वादशाक्षरपरिमितः पादो बोध्यः ॥

( २० )

## श्रीमुनिसुव्रतनाथचैत्यवन्दनम्

( स्त्री[२०] )

सुव्रतनामा मम हृदयेशः
कामविनाशे महितमहेशः ।
आत्मविकाशप्रहततमिस्रो
भावदिनेशो जयतु जिनेशः ॥ १ ॥

नैकविधानि प्रथिततपांसि
चेतसि धृत्वा हर हर कर्म ।
इत्युपदेशाद्धृतजनदोषो
यच्छतु मुक्तिं शिवसुखकोषः ॥ २ ॥

केवलसंविद्विकशितलोको
निर्मलवाण्या हतजनशोकः ।
संसृतिसिन्धुप्रवहणतुल्यो
रक्षतु नित्यं व्यपगतशल्यः ॥ ३ ॥

---

२० "पञ्चरसैः स्त्री भतनगगैः स्यात्" इति लक्षणम् । यत्र भ–त–नगणास्ततो गुरुद्वयं च चेत् एवं पञ्चषट्सु विरामश्च सा स्त्रीत्यर्थः । श्लोकेऽस्मिन् एकादशाक्षरपरिमितः पादो बोध्यः ॥

## ( २१ )

## श्रीनमिनाथचैत्यवन्दनम्

( कुसुमविचित्रा[२१] )

भज भज देवं ह्यनघविरामं
वरमतिकान्तं चरणनिशान्तम् ।
न भजति लोको गमयति जन्म
शरणममुं हा व्यपगतदोषम् ॥ १ ॥

गतभवशापं प्रशमरतिन्तं
हृतमतिपापं जगति दुरापम् ।
नमिजिननाथं कविकृतगाथं
नमति सुरम्यं भवति स धन्यः ॥ २ ॥

हरिहरमान्यं विरतिवदान्यं
भविकशरण्यं यशसि वरेण्यम् ।
गुणिजनगण्यं रुचिगणधिष्ण्यं
भजति नितान्तं व्रजति स शान्तिम् ॥ ३ ॥

---

२१ "नयसहितौ न्यौ कुसुमविचित्रा" इति लक्षणम् । यत्र न–य–न–यगणा भवेयुः सा कुसुमविचित्रेत्यर्थः । श्लोकेऽस्मिन् द्वादशाक्षरप्रमाणं चरणं ज्ञेयम् ॥

( २२ )

## श्रीनेमिनाथचैत्यवन्दनम्

( मत्ता[२२] )

त्यक्त्वा राजीमतिमतिरूपां
प्राज्यं राज्यं च मुनिपतिर्यः ।
भिक्षोर्भावं धरति जिनोऽयं
लोकान् पायात् त्रिभुवनदेवः ॥ १ ॥

बाल्यब्रह्मव्रतविमलात्मा
क्षान्त्यम्भोधेरमृतमरीचिः ।
आत्मज्योतिर्विमलितलोको
नित्यं नन्द्यादपगतशोकः ॥ २ ॥

शैवेयो यो निजतनुभासा
जित्वाऽम्भोदं वचनसुधाभिः ।
वृष्ट्वा तापं जनिजमहार्षीत्
भव्यानां नो भवतु पतिः सः ॥ ३ ॥

---

२२ "ज्ञेया मत्ता मभसगयुक्ता" इति लक्षणम् । यत्र म–भ–सगणास्ततो गुरु चेत् तदा मत्तेत्युच्यते । श्लोकेऽस्मिन् दशाक्षरप्रमाणं चरणं ज्ञेयम् ॥

( २३ )

## श्रीपार्श्वनाथचैत्यवन्दम्

( चञ्चरीकावली[२३] )

गुणश्रेणिं शान्तं कामवल्लीकृपाणं
ब्रुडत्प्राणिव्रातोत्तारणे नौसमानम् ।
अघौघं हन्तारं सेव्यमानं सुभव्यै-
र्नमामि श्रीपार्श्वं देवदेवेशपूज्यम् ॥ १ ॥

प्रधानं देवेषु प्राज्ययोगर्द्धिदीप्रं
जगद्वादिव्रातं चारुतत्त्वप्रकाशम् ।
नयन्तं नेतारं शान्तिपीयूषराशिं
कषायान्निर्मुक्तं संस्तवीमि स्मरामि ॥ २ ॥

निरीहं निर्द्वन्द्वं दुःखदावाग्निनीरं
कृपापारावारं स्वर्णशैलेशधीरम् ।
विकाशे विद्यानां मूलरूपं जिनेशं
सदा सेवे पार्श्वं नीलजीमूतभासम् ॥ ३ ॥

---

२३ "यमौ रौ विख्याता चञ्चरीकावलीगः" इति लक्षणम् । यत्र य–म–र–रगणास्तदनन्तरं गुरु च स्यात् सा चञ्चरीकावली-त्युच्यते । श्लोकेऽस्मिन् त्रयोदशाक्षरपरिमितः पादो बोध्यः ॥

( २४ )

## श्रीमहावीरजिनचैत्यवन्दनम्

( उपेन्द्रवज्रा[२४] )

न वर्णनीयो गुरुभिः प्रभुर्यः
　　मया कथं वर्णयितुं स शक्यः ? ।
तथापि वाचालतया स्तवीमि
　　प्रभो ! गुणांस्ते शशितोऽतिगौरान् ॥ १ ॥

प्रभो ! वचः स्यात्पदलाञ्छितं मे
　　विषं जहार प्रबलं मनोगम् ।
अनिष्टमेकान्तमयं दयालो !
　　तवोपकारं नहि विस्मरामि ॥ २ ॥

प्रमाणवादः परमप्रतिष्ठो
　　विवादवैवश्यविनाशकारी ।
तवास्त्यतो वीर ! विशालभावं
　　नमामि सिंहाङ्कितपादपद्मे ॥ ३ ॥

नयान् विभज्याद्भुतशास्त्रसिन्धौ
　　विपक्षवादाः प्रभुणा गृहीताः ।

---

२४ "उपेन्द्रवज्रा जतजास्ततो गौ" इति लक्षणम् । यत्र ज-त-जगणास्ततो द्वौ गुरू च स्याताम् सा उपेन्द्रवज्रोच्यते । श्लोकेऽस्मिन् एकादशाक्षरपरिमितः पादो बोध्यः ॥

उदन्वतेवाखिलनिर्झरिण्यः
महानतस्त्वं सकलार्थवित्सु ॥ ४ ॥
अनर्घरत्नत्रितयं जगत्यां
त्रिशल्यनाशे प्रथितं त्रिशूलम् ।
उपाधिहारि त्वयका व्यकाशि
प्रकृष्टलब्धि प्रणमाम्यतस्त्वाम् ॥ ५ ॥

( २५ )

## श्रीसीमंधरजिनचैत्यवंदनम्

( वातोर्मी[२५] )

पञ्चत्रिंशद्गुणपूर्णां गिरन्ते
मृद्वीं मृद्वीं सुरगेयां मनोज्ञाम्
श्रृण्वन् श्रृण्वन् सुखपाथोधिमग्नो
भक्त्याऽहं स्यां प्रभुसीमंधर ! द्राक् ॥ १ ॥
युष्मद्ध्यानं मम पापं प्रहर्तृ
प्राकट्यं ते गुणपुञ्जो बिभर्त्ति ।
नाम्नाऽह्लादोऽमरसौख्याद्विशेषो
नित्यं सेवे चरणाम्भोजयुग्मम् ॥ २ ॥

---

२५ "वातोर्मी गदिताम्भौतगौगः" इति लक्षणम् । यत्र म-भ-तगणास्ततो गुरु द्वयं च चेत् सा वातोर्मीत्युच्यते । अस्मिन् श्लोके एकादशाक्षरपरिमितः पादो बोध्यः ॥

चारित्रं ते सविधेऽहं कदैत्य
लप्स्ये स्वामिन्निति वाञ्छा सदा मे ।
पूर्त्तिं यायात् कृपया स्वच्छचेतः
सैवं कुर्यास्सुरनाथाधिनाथ ! ॥ ३ ॥

( २६ )

## श्रीसिद्धगिरिचैत्यवन्दनम्

( [२६]दोधक वृत्तम् )

कञ्चनशैलशिखामुकुटं तं नाभितनूजमनुत्तमरूपम् ।
आदिजिनेशमहं सुरपूज्यं स्तौमि मुदा गुणरत्नवचोभिः ॥ १ ॥

यत्र पदार्पणतश्शुभभावोऽनन्तगुणः समुदेति जनस्य ।
मुक्तिमनन्तजनाश्च यतोऽगुस्तं गिरिराजमहं प्रणमामि ॥ २ ॥

तीर्थंकरप्रतिमा गुणकान्ता यत्र निरीक्ष्य महागुणभाजः
हर्षकराः प्रणता भविलोकास्तं गिरिराजमहं प्रणमामि ॥ ३ ॥

सायककोटिमितैर्मुनिवर्यैरादिगणी प्रविधाय च यत्र ।
मुक्तिमगादुपवासतपस्यां तं गिरिराजमहं प्रणमामि ॥ ४ ॥

---

२६ "दोधकवृत्तमिदं भभभाद्गौ" इति लक्षणम् यत्र भ–भ–भगणास्ततो द्वौ गुरु च चेत् तद् दोधकवृत्तमुच्यते। अस्मिन् श्लोके एकादशाक्षरपरिमितियुक्त पादो ज्ञेयः ।

( २७ )

## श्रीसिद्धचक्रचैत्यवन्दनम्

( २७ मत्तेभविक्रीडितम् )

सकलाभीष्टदमुत्तमं नवपदं सल्लब्धिदं राजतां
सुमनोवृक्ष इवास्य तीर्थपतयः सिद्धा मुनीशास्तथा ।
हितकृद्वाचकसाधवश्च सुतपो रत्नत्रयं सुन्दरं
नव शाखाश्च फलं प्रतीतमहिमाऽऽनन्दाब्धिनिःश्रेयसम् ॥१॥

जगती सारमयं महागुणमयं संविन्मयं भामयं
सुमनोध्येयमयं दयारसमयं सिद्धान्तविद्यामयम् ।
भविनां कर्महरं मनोहरनिधिं श्रीपालपीडाहरं
मनसा भक्तियुतः स्तवीमि सततं श्रीसिद्धचक्रं वरम् ॥ २ ॥

असुमत्कर्महरं सुदर्शनमिदं चक्रं वरं भासते
गुणसंस्थानजुषां यदर्चनबलान्नित्यं गुणो वर्धते ।
अमृतस्थानपिपासुभव्यजनतानिर्बाधसत्स्यन्दनं
जगतीव्यापकमेतदेव भजतां श्रीसिद्धचक्रं परं ॥ ३ ॥

---

२७ "सभरान् मौयलगास्त्रयोदशयतिर्मत्तेभविक्रीडितम्" इति लक्षणम् । यत्र स-भ-र-न-म–यगणास्ततो लघुगुरूचेत् तदा मत्तेभविक्रीडितमित्युच्यते अस्य वृत्तस्य त्रयोदशभिः सप्तभिश्च वर्णैर्यतिर्भवति विंशत्यक्षरपरिमाणवत् चरणमिति विज्ञेयम् ।

## ( २८ )

## श्रीपर्युषणपर्वचैत्यवन्दनम्

( स्रग्विणी[२८] )

प्राणिनां वार्षिकं पर्व सन्तारकं
वारकं कर्मणामापदां हारकम् ।
नाशकं दुर्गतेः संपदां कारकं
सर्वपर्वोत्तमं संसृतेः पारकम् ॥ १ ॥

स्वर्गसंदायकं सद्गुणस्मारकं
प्रेरकं ज्योतिषां दुर्हृदां दारकम् ।
रक्षकं मृत्युतो दुर्मतेर्भञ्जकं
तीर्थपैः प्रोक्तमेतद्ध्रुवं सेव्यताम् ( युग्मम् ) ॥ २ ॥

यस्य सेवामृते नारकं चारकं
संधृतं भूरिशो जन्तुना दृश्यते
क्लेशहृच्छुद्धिकृद् भीतिहृन्मुक्तिकृत्
भावुकं भावतस्तद्भजन्तां जनाः ॥ ३ ॥

यत्र तीर्थंकराणां चरित्रं महद्
गीयते श्रूयते भाग्यवद्भिर्जनैः ।
पद्मपंक्तिर्मुनेश्शिक्षणं वर्ण्यते
भावुकं भावतः तद्भजन्तां जनाः ॥ ४ ॥

---

२८ "रैश्चतुर्भिर्युतास्रगविणी सम्मता" इति लक्षणम् । यत्र चत्वारो रगणास्स्युः सा स्रग्विणीत्युच्यते। अस्मिन् श्लोके द्वादशाक्षरपरिमाणचरणमवसेयम् ।

( २९ )

## श्रीज्ञानपञ्चमीचैत्यवन्दनम्

( प्रमदाननम्[२९] )

शुभचित्तदायकविश्वनायकवीरनाथविकासितं
सदसत्पदार्थविवेचनाचणबुद्धिपर्वसमुज्ज्वलम् ।
मतिमान्द्यपङ्कविशोधकं सुखकारकं त्वरितं जनाः
सितकार्त्तिके शुभपञ्चमीदिवसे हृदा समुपास्यताम् ॥ १ ॥

अतिमोहगाढतमिस्रहारकभानुपञ्चचिदर्चिता
भुवनाऽखिलोच्चशुभालिसस्यसमुद्भवाम्बुदसन्निभा ।
सकलात्मसद्गुणवाटिकासुमराजिफुल्लमधूपमा
सितपञ्चमीषु यथागमं भविनोऽनिशं समुपास्यताम् ॥ २ ॥

गुणमञ्जरीवरदत्तसर्वरुजां विनाशनतोऽधिकं
प्रथितं क्षितौ शुभपञ्चमीव्रतमेतकद् भविनां हितम् ।
गुणरूपधीसमुपासनात् समुपासिता निखिला जिनाः
भविभिः समीहितसाधनं कलिबाधनं समुपास्यताम् ॥ ३ ॥

---

२९ " सजजाभरौ सलगाश्च चेदुदितं तदा प्रमदाननम् " इति लक्षणम् । यत्र स–ज–ज–भ–र–सगणास्ततो लघुगुरुद्वयं च चेत् तदा प्रमदाननमित्युच्यते । अस्मिन् श्लोके विंशत्यक्षरपरिमितः पादो बोध्यः

( ३० )

## श्रीमौनैकादशीचैत्यवन्दनम्

( मेघविस्फूर्जिता[३०] )

सिते मार्गे मासे सुगुणकरमेकादशीपर्व रुच्यं
श्रिया युक्तं शुद्धं प्रवरमुनिभिस्सेवितं सौम्यभावैः ।
हरेः प्रश्नात् सारं प्रकटितमिदं नेमिना तीर्थपेन
धियो वृद्ध्यै नित्यं शिवसदनदं भावुका ! आचरन्तु ॥१॥

जिनानामभ्रेषुक्षितिमितिककल्याणकं शर्मदायि
तिथौ यस्यां जातं दुरिततिमिरश्रेणिहन्त्र्यां समन्तात् ।
पवित्रां तां हित्वा प्रवरमतिभिः पूज्यमाना सुरेन्द्रै
र्भवाहेर्भीतीनां गरुडनिवहां काऽपरा सेवनीया ? ॥ २ ॥

तिथावस्यां मौनं समुपगतवच्छ्रेष्ठिनः सुव्रतस्य
गृहं दग्धं नो वै नगरदहने तत्परेणाऽग्निनाऽपि ।
मनोवाक्कायानां नियमनकरी स्तूयमाना जिनेशै
स्सदा सेव्या भव्यैर्वितरतु शिवं भक्तितोऽनुष्ठिता मे ॥३॥

---

३० " रसर्त्वश्वैर्यमौन्सौररगुरुयुतौ मेघविस्फूर्जितास्यात् " इति लक्षणम् । यत्र-य-म-न-स-र-र-गणास्ततो गुरुश्च षट् षट् सप्तभिश्च वर्णैर्विरामः स्यात् सा मेघविस्फूर्जिता । अस्मिन्श्लोके एकोनविंशत्यक्षरपरिमितः पादो विज्ञेयः ।

( ३१ )

## श्रीऋषभाननजिनचैत्यवन्दनम्

( स्वागता छन्दः[३१] )

लोकपूज्यमृषभानननाथं मन्मथाग्निशमने जलकल्पम् ।
आत्मशुद्धिकरमुत्तमबिम्बं तोष्टवीमि विभुकीर्तिमनर्घम् ॥१॥
जन्ममृत्युहरणे धृतशक्तिं मुक्तये नरसुरैः कृतभक्तिम् ।
शाश्वतं सुगुणमौक्तिकशुक्तिं तोष्टवीमि विभुकीर्तिमनर्घम् ॥२॥
दीनहीनजनतावनदक्षं सर्वजीवहितताकृतशिक्षम् ।
कालनाशकरणे दृढशक्तिं तोष्टवीमि विभुकीर्तिमनर्घम् ॥३॥

( ३२ )

## श्रीचन्द्राननजिनचैत्यवन्दनम्

( विपरीताख्यातकी छन्दः[३२] )

जिनेन्द्रचन्द्राननामकन्तम् पूतं पुनानं सकलां त्रिलोकीम् ।
विशालकान्ति विशदाशयं वै विद्यासमुद्रं प्रणमामि नित्यम् ॥१॥

---

३१ " स्वागतेतिरनभाद्गुरुयुग्मम् " इति लक्षणम् । यत्र र–न–भगणास्ततो गुरु युग्मं चेत् तदा स्वागतेत्युच्यते । अस्मिन् श्लोके एकादशाक्षरपरिमितः पादो बोध्यः ।

३२ " जतौ जगौ गोविषमे समे चेत् । तौ ज्गौ ग एषा विपरीतपूर्वा " इति लक्षणम् । यत्र विषमे पादे ज–त–जगणा-

तमःपरंभास्वररूपमूर्तिं विस्फूर्तिमन्तं जननं गुणानाम् ।
कलाकलापं भवतारणाय गृह्णन्तमेनं प्रणमामि नित्यम् ॥ २ ॥

जगत्त्रयीतारकदेवदेवमात्माभिरामं कमलाक्षमीशम् ।
सुलब्धिदातारमनङ्गकेतुं विश्वाभिवन्द्यं प्रणमामि नित्यम् ॥३॥

( ३२ )

## श्रीवारिषेणजिनचैत्यवन्दनम्

( प्रमाणिका छन्दः[33] )

जिनेश वारिषेणतो भवाब्धिपारगा जनाः ।
भवन्ति तेन भावुका भजन्तु तं निरन्तरम् ॥ १ ॥

अनन्तशक्तिशालिनं गुणालिरत्नमालिनम् ।
नमाम्यनादिकालिकं विशुद्धबुद्धिदायकम् ॥ २ ॥

विशिष्टदेवपूजितं सदैव शाश्वतं जिनम् ।
सहस्रभानुभासुरं दयाकरं स्तवीम्यहम् ॥ ३ ॥

---

स्ततो गुरुद्वयं च चेत् समे पादे त–त–जगणास्ततो गुरू च चेत् सा विपरीताख्यातकी भवति । श्लोकेऽस्मिन् एकादशाक्षरपरिमित-श्चरणमवसेयम् ।

३३ "प्रमाणिका जरौ लगौ" इति लक्षणम् । यत्र ज–र गणौ ततः लघुगुरू चेत् तदा प्रमाणिकानाम । अस्मिन् श्लोके अष्टाक्षरपरिमितः पादो बोध्यः ।

अशेषजन्तुरक्षणे कृतादरो मुनीश्वरैः ।
जिनेशकर्मकार्यभूदिति श्रयाम्यहं मुदा ॥ ४ ॥

निमज्जतां भवाम्बुधौ जिनोन्तरीपवन्मतः ।
विपाकतः सुकर्मणां स्मराम्यहं हृदा ततः ॥ ५ ॥

( ३४ )

## श्रीवर्धमानजिनचैत्यवन्दनम्

( प्रहर्षिणी छन्दः[३४] )

तीर्थेशं रिपुविजयोन्नतं महान्तं
विश्वेशं जनततिपालने समर्थम् ।
दुःखाब्धावुडुपनिभं प्रशान्तमूर्तिं
नित्यस्थं प्रणमत वर्धमानबिम्बम् ॥ १ ॥

ऊर्ध्वस्थं नरभुवनेऽपि राजमानं
पाताले सुरनिकरैः सदार्च्यमानम् ।

---

३४ "म्नौ ज्रौ गस्त्रि दशयतिः प्रहर्षिणीऽयम्" इति लक्षणम् । यत्र म–न–ज–रगणास्ततो गुरुश्चेत् त्रिभिर्दशभिश्चयतिः स्यात् तर्हि प्रहर्षिणीत्युच्यते । श्लोकेऽस्मिन् त्रयोदशाक्षरपरिमितश्चरणमवसेयम् ।

लक्षणानि मयाऽलेखि छन्दसां ज्ञानहेतवे ।
सूरीशैः कृतकाव्यानां बालविक्रमभिक्षुणा ॥

मोहघ्नं वरसुखदं विकासजुष्टं
नित्यस्थं प्रणमत वर्धमानबिम्बम् ॥ २ ॥

भावारिप्रमथनविक्रमं जिनेन्द्रं
दातारं प्रणतजनस्य सद्गुणानाम् ।

त्रातारं भवभयभीतभावुकानां
नित्यस्थं प्रणमत वर्धमानबिम्बम् ॥ ३ ॥

इति श्रीमद्विजयलब्धिसूरीश्वरविरचिता
चैत्यवन्दनचतुर्विंशतिः
—: समाप्ता :—



# श्री लब्धिसूरीश्वर जैन ग्रन्थमाला ।

| | | |
|---|---|---|
| १ | जैनव्रतविधिसंग्रह | ०–८–० |
| २ | हीरप्रश्नोत्तराणि | ०-१२-० |
| ३ | श्रीपालचरित्रम् | भेट |
| ४ | तत्त्वन्यायविभाकरः | ०–८–० |
| ५ | पंचसूत्रम् | भेट |
| ६ | हरिश्चन्द्रकथानकम् | भेट |
| ७ | वैराग्यरसमंजरी | भेट |
| ८ | चैत्यवंदनचतुर्विंशतिः | ०–२–० |
| ९ | कविकुलकिरीट | प्रेस |
| १० | मूर्तिमंडन | प्रेस |
| ११ | आरंभसिद्धि | प्रेस |